UUCMS. No. | | | | | | | | | | | |

# B.M.S. COLLEGE FOR WOMEN
## BENGALURU – 560 004
## I SEMESTER END EXAMINATION – JAN/FEB 2024

### B.B.A., B.Voc.RM - SAMSKRUTAM

**Kumarasambhava V Canto, Grammar and Comprehension**
**(NEP Scheme 2021-22 onwards F+R)**

**Course Code: BBA1AECSA01** **QP Code:1109**
**Duration: 2 ½ Hours** **Max. Marks: 60**

**Instructions: 1) Answer in Sanskrit / Kannada / English**

**2) Answer Q. Nos. I, V and VI in Sanskrit only**

**I. समीचीनम् उत्तरं चित्वा लिखत ।** 1x10 =10

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select and write the correct answer.

1. पार्वत्या: माता का ?
   अ) मेना आ) रमा इ) राधा ई) सावित्री
2. पार्वत्या: तपोवनं क: प्रविवेश ?
   अ) इन्द्र: आ) विष्णु: इ) शिव: ई) ब्रह्मा
3. शिव: केन रूपेण तपोवनं प्रविवेश ?
   अ) वामनरूपेण आ) जटिलरूपेण इ) वराहरूपेण ई) नरसिंहरूपेण
4. प्रथमाश्रम: क:?
   अ) ब्रह्मचर्याश्रम: आ) गृहस्थाश्रम: इ) सन्यासाश्रम: ई) वानप्रस्थाश्रम:
5. किं पावनं बभूव ?
   अ) गृहम् आ) शरीरम् इ) तपोवनम् ई) उद्यानम्
6. पार्वत्या: अपरं नाम किम् ?
   अ) रोहिणी आ) रागिणी इ) गौतमी ई) अपर्णा
7. किं मृग्यते ?
   अ) पुष्पम् आ) रत्नम् इ) आभरणम् ई) फलम्
8. वृषराजकेतन: क: ?
   अ) पर्वतराज: आ) षण्मुख: इ) शिव: ई) वरुण:
9. कुमारसम्भवस्य मूलं किम् ?
   अ) शिवपुराणम् आ) विष्णुपुराणम् इ) नारदपुराणम् ई) गरुडपुराणम्

BMSCW LIBRARY

10. कुमारसम्भवस्य कर्ता क:?

अ) वेदव्यास:　　आ) कालिदास:　　इ) कुमारदास:　　ई) भारवि:

**II. द्वयोः प्रबन्धं लिखत । ಎರಡನ್ನು ಕುರಿತು ಕನ್ನಡದಲ್ಲಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.** **2x8 =16**

**Write an essay on any two of the following.**

अ) कालिदासस्य देश-काल-कृति-प्रशस्तीनां विषये लिखत।
ಕಾಲಿದಾಸನ ದೇಶ, ಕಾಲ, ಕೃತಿ ಮತ್ತು ಬಿರುದುಗಳನ್ನು ವಿವರಿಸಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write about the date, place, works and titles of Kalidasa.

आ) पार्वत्या: तपश्चर्यां वर्णयत।
ಪಾರ್ವತಿಯ ತಪಶ್ಚರ್ಯೆಯನ್ನು ವರ್ಣಿಸಿ, ಪ್ರಬಂಧಬರೆಯಿರಿ.

इ) पार्वतीब्रह्मचारिणो: संवादस्य सारं लिखत।
ಪಾರ್ವತಿ ಮತ್ತು ಬ್ರಹ್ಮಚಾರಿಯ ನಡುವೆ ನಡೆದ ಸಂಭಾಷಣೆಯ ಸಾರಾಂಶವನ್ನು ವಿವರಿಸಿ.
Describe the dialogue between Parvati and Brahmacharin.

**III. त्रयाणां श्लोकानाम् अनुवादं कृत्वा विवृणुत ।** **3x3 =9**

**ಯಾವುದಾದರೂ ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.**

**Translate any three shlokas and explain.**

१. तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता॥

BMSCW LIBRARY

२. प्रतिक्षणं सा कृतरोमविक्रिया
व्रताय मौञ्जीं त्रिगुणां बभार याम्।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रसनागुणास्पदम्॥

३. विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि।
नवोटजाभ्यन्तरसम्भृतानलं
तपोवनं तच्च बभूव पावनम्॥

४. निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसंभृतेन सा।
तपात्यये वारिभिरुक्षतानवै:
भुवा सहोष्माणममुञ्चदूर्ध्वगम्॥

५. कुले प्रसूति: प्रथमस्य वेधस:

त्रिलोकसौन्दर्यमिवोदितं वपु:।
अमृग्यमैश्वर्यसुखं नवं वय:
तप:फलं स्यात् किमत: परं वद॥

**IV. वाक्यद्वयं ससन्दर्भं विवृणुत।** 2x3 = 6

ಯಾವುದಾದರೂ ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಸಂದರ್ಭ ವಿವರಿಸಿ.

Explain with reference to context any two of the following sentences.

१. शिरीषपुष्पं न पुन: पतत्रिण:।

२. निषेदुषी स्थण्डिल एव केवले।

३. प्रभाम् अनन्यदृष्टि: सवितारमैक्षत।

४. शरीरबद्ध: प्रथमाश्रमो यथा।

**V. संस्कृतभाषया उत्तराणि लिखत।**

**अ) पञ्चानां लिङ्ग-विभक्ति-वचनानि लिखत।** 5x1 =5

१. पार्वती २. गृहेषु ३. भ्रमरस्य ४. प्रजासु

५. कन्दुकात् ६. वृक्षकान् ७. मुखेन ८. धर्म:

**आ) चतुर्णां लकार-पुरुष-वचनानि लिखत।** 4x1 =4

१. निनिन्द २. सन्ति ३. प्रतीपयेत् ४. वदसि

५. अगच्छत् ६. पठिष्यन्ति ७. प्रकाशते ८. लिखामि

**VI. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।** 2x5=10

आदिकाव्यं रामायणं मम प्रियपुस्तकम् अस्ति। भगवतो मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य पावनं चरित्रं रामायणे प्राप्यते। अस्य आदिकाव्यस्य कर्ता महर्षि: वाल्मीकि: अस्ति। तस्य रचना आदिकाव्यम् इति वेदविदुषां मतम्। अत एव वाल्मीकि: आदिकवि: इति प्रसिद्ध: अस्ति।

रामायणम् अनुष्टुप् छन्दसि लि खितम्। रामायणे चतुर्विंशतिसहस्राणि श्लोका: सन्ति। अस्मात् कारणात् रामायणं चतुर्विंशतिसाहस्री-संहिता इति विद्वद्भि: कथ्यते। देवर्षिनारदस्य प्रेरणया ब्रह्मण: आशीर्वादेन च आदिकविना वाल्मीकिना इदं महाकाव्यं विरचितम् । रामायणे सप्त काण्डा : सन्ति। ते – बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तरकाण्डाः इति। रामायणे श्रीमन्नारायणस्य श्रीरामचन्द्र-अवतारस्य वर्णनम् उपलभ्यते।

**अधोलिखितप्रश्नानाम् उत्तरं संस्कृतभाषया लिखत।**

१. रामायणस्य कर्ता क: ? २. वाल्मीकि: क इति प्रसिद्ध: अस्ति ?

BMSCW LIBRARY

३. रामायणं कस्मिन् छन्दसि लिखितम् ? ४. रामायणे कति श्लोका: सन्ति ?

५. रामायणे कस्य अवतारस्य वर्णनम् उपलभ्यते ?

----------